NICAL TERMS


NATYAŚĀSTRA

AN INDEX

नाट्यशास्त्रीय-पारिभाषिक-शब्दानुक्रमणिका

Banji Upadhyaya [illegible]



महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.....
भारती पुस्तकालय



TECHNICAL TERMS

IN NATYAŚĀSTRA

AN INDEX



नाट्यशास्त्रीय-पारिभाषिक-शब्दानुक्रमणिका

Ramji Upadhyaya, M.A., D.Phil., D. Litt.

Bharatiya Sanskriti Sansthanam
P. O. Naribari, Allahabad

First Edition 500
1980

Rs.15/-

Distributors :
Ram Narain Beni Madho
Publishers and Booksellers
Katra, Allahabad

Printers— Arun Press, Tilbhandeshwar, Varanasi

INTRODUCTION : BACK TO BHARATA

The earliest available work on Sanskrit dramaturgy is the *Nāṭyaśāstra* of Bharata. It has been recognised as the most unique work of its type not only in India but the world over, providing, as it does the most comprehensive treatment of almost all aspects of dramaturgy. Quite a large number of small and big works was produced before Bharata and he utilised them in his own way. Sometimes he quoted them even verbatim The extant *Nāṭyaśāstra* shows that its original text was exposed to additions, emendations and alterations for as many as seven long centuries at the least. In spite of all this, the work, by and large, maintains a high standard and consistency throughout and maintains its primacy of originality as a source of ancient dramaturgical literature.

After Bharata a good many treatises on dramaturgy were compiled as also several supplementaries and commentaries on the *Nāṭyaśāstra* by several competent scholars. Many of these works were made use of by Abhinavagupta in preparing his *Abhinavabhāratī*, the commentary par excellence on the *Nāṭyaśāstra* in the beginning of the eleventh century.


The very merit of comprehensiveness of the *Nāṭyaśāstra*, *Abhinavabhāratī* and other commentaries proved detrimental to their popularity. Dhanañjaya in his *Daśarūpaka* has pointed out the demerit of comprehensiveness in the following words—

व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः ।
तस्यार्थस्तत्पदैस्तेन संक्षिप्य क्रियतेऽञ्जसा ॥

He admits that the *Daśarūpaka* was composed for half-witted people as a compendium of the *Nāṭyaśāstra*. But then, it was hailed not by the less-witted alone but by almost all the great poeticians of the later periods. It eclipsed, so to say, the *Nāṭyaśāstra*.

I have shown in my book *Daśarūpakatattvadarśanam* that the *Daśarūpaka* of Dhanañjaya is not a standard work on dramaturgy on account of the following reasons *inter alia*—

1. Dhanañjaya has quite often deviated from Bharata unnecessarily and, while doing so, he has been prone to commit errors.
2. He has introduced, at several places, some new tenets of dramaturgy which cannot be substantiated by the facts of the dramas.



Other popular dramaturgical works are the *Śṛṅgāraprakāśa*, *Sarasvatīkaṇṭhābharaṇa*, *Nāṭakalakṣaṇaratnakośa*, *Nāṭyadarpaṇa*, *Bhāvaprakāśana*, *Pratāparudrayaśobhūṣaṇa*, *Sāhityadarpaṇa*, *Alaṅkārasaṅgraha*, *Rasārṇavasudhākara* and *Nāṭakacandrikā*. They all provide quite often inferior material, mostly because their authors did not care to scrutinise if what they said was applicable to dramas. They have generally not gone beyond the *Daśarūpaka* in search of the true perspective of dramaturgical tenets.

The later literature on dramaturgy has left an unhealthy effect on the study of both Sanskrit drama and dramaturgy. Under such circumstances there is no other course open to students of drama and dramaturgy except to fall back upon the *Nāṭyaśāstra* of Bharata.

When I say 'back to Bharata' I purpose to say that the seekers should derive their knowledge from a more refined, elegant and reliable source than what is there in the later works on dramaturgy. I may be permitted to use a simile here. As those, who want the pure and fresh waters of the Ganges, must be recommended to get it from the Himalayan regions and not from the plains, similarly the true concepts of Sanskrit dramaturgy must be had from Bharata and not from *Dhanañjaya* or *Viśvanātha*.

The present work, an index of the dramaturgical terms in the *Nāṭyaśāstra*, has been attempted with a view to creating a fresh interest in the original text of Bharata. While searching for the correct import of a dramaturgical term according to Bharata, one will greatly benefit by looking into its usage at all the places in the book. The present work shows that the same word occurs in different contexts in different chapters and by putting them together we may obtain a true and correct insight into what the ancient sage had in mind.

There is quite a large number of printed editions of the *Nāṭyaśāstra*. I have selected for my reference the one published by the Gaekwad Oriental Series, University of Baroda. Even this edition may not be said to be perfect, but then it happens to be the best so far, being more critically edited one than the others.

I hope the readers will find it worthy of their expectations.

September 11, 1980
B/17 University,
SAGAR.

R. Upadhyaya

भरतानुवीक्षणम्

संस्कृतनाट्यस्येदानीमुपलभ्यमानः प्राचीनतमो ग्रन्थो भरतकृत–नाट्यशास्त्रनामा । अयं नाट्यस्य प्रायः सम्पूर्णानि अङ्गानि सविस्तरं प्रतिपादयति न केवलं भारते वर्षेऽपितु समग्रे विश्वेऽनुत्तममिति प्रतिष्ठितम् । भरतादपि प्राङ्नाट्यविषयका अनेके ग्रन्था आसन्, येषां स्वीयदृष्ट्या नाट्यशास्त्र भरताचार्येणोपयोगो विहितः । स यत्र तत्र यथावदक्षरशस्तानुद्धरति । अद्यतनीयोपलब्धनाट्यशास्त्राध्ययनादसन्दिग्धमिदं यद् भरतस्य पश्चात् सप्तशताब्दं यावदस्य मूलपाठे परिवर्जन-संशोधनपरिवर्तनानि समपद्यन्त । तथाप्यस्मिन् ग्रन्थे भूयिष्ठमानुरूप्यं दृश्यते ।

भरतमनु नाट्यशास्त्रविषये भूयांसो ग्रन्थाः प्रणीताः । प्रभूतैर्विद्वद्भिर्नाट्यशास्त्रस्य परिशिष्टानि निबद्धानि वृत्तयष्टीकाश्च रचिताः । ख्रीस्तीयैकादशशताब्दारम्भे तत्रभवान् "अभिनवगुप्तपादाचार्यो नाट्यशास्त्रमधिकृत्याभिनवभारती--टीका-प्रणयने पूर्वोपनिबद्धां नाट्यशास्त्रविषयिणीं व्याख्यासामग्रीं यथेष्टमुपहृतवान् ।

नाट्यशास्त्रस्याभिनवभारती-टीकाया अन्यासां टीकानां च व्याकीर्णत्वम्, बहुव्यापकत्वं नाम यो गुणः स तेषां प्रचारे प्रसारे लोकप्रियतायाञ्च बाधकोऽभवत् । धनञ्जयो नामाचार्यः दशरूपकमिति ग्रन्थे नाट्यशास्त्रस्य व्याकीर्णत्वं व्यापकत्वञ्चेत्थं व्याक्रोशति—

"व्याकीर्णे मन्दबुद्धीनां जायते मतिविभ्रमः ।
तस्यार्थस्तत्पदैस्तेन संक्षिप्य क्रियतेऽञ्जसा ।

धनञ्जयः स्फुटं निर्दिशति यत् मन्दबुद्धीनां बोधाय मया नाट्यशास्त्रसंग्रहात्मा "दशरूपकं" नाम ग्रन्थो विरच्यत इति । किन्तु स न केवलं मन्दबुद्धिभिरेव समादृतोऽपितु परवर्तिभि प्रायः सर्वैर्महत्तरैरपि साहित्यशास्त्राचार्यैः परिगृहीतः । तेन च नाट्यशास्त्रस्य महिमालीयत । मया दशरूपक-तत्त्वदर्शननाम्नि ग्रन्थे प्रतिपादितं यन्नास्ति धनञ्जयप्रणीतं दशरूपकं नाट्यविद्यायां परमं प्रमाणम् । तत्र च इमे तर्काः —

(१) धनञ्जयो भरतानुकरणं व्यदधेति, तथाकरणे च बहुधा स्खलति ।
(२) बहुषु स्थलेषु स नाट्यस्य तादृशानि नवीनानि मतानि उपनिबध्नाति, यानि रूपक-दृष्ट्या संस्थापयितुमशक्यानि ।


नाट्यविषयका दशरूपकातिरिक्ताः प्रख्याता इमे ग्रन्थाः सुप्रथिताः —

शृङ्गारप्रकाशः, सरस्वतीकण्ठाभरणम्, नाटकलक्षणरत्नकोषः; नाट्यदर्पणः भावप्रकाशः, प्रतापरुद्रयशोभूषणम्, साहित्यदर्पणः, अलङ्कारसारसंग्रहः, रसार्णवसुधाकरः, नाटकचन्द्रिका च । एतेषां ग्रन्थानां प्रणेतृभी रूपकाणां विषये स्वकीयेषु ग्रन्थेषु यदुक्तं तन्नाटकानुसारं न वेति सूक्ष्मेक्षिकया एतैर्नानुशीलितम् । अत एव एतेषां ग्रन्थानां नाट्यविषयिणी सामग्री स्वल्पैव । नाट्यविषयाणां मतानां याथार्थ्यपरिज्ञाने स्वरूपविवेचनेऽन्वेषणे च दशरूपकपर्यवसायिन्येव तेषां मतिः नोर्ध्वं ततः ।

नाट्यशास्त्रादनन्तरं प्रणीता नाट्यग्रन्थाः संस्कृतरूपकाणां नाट्यस्य चाध्ययनेऽनुशीलने न तथोपयोगिनः प्रभावशालिनश्च यथा नाट्यशास्त्रम् । अस्यां स्थितौ संस्कृतरूपकाणां नाट्यस्य विवेचकानां कृते भरतस्य नाट्यशास्त्रमेव परमाश्रय । नाट्ये "भरतः परमाश्रयः" इति मम वचनस्यायमाशयो यत् जिज्ञासुभिर्नाट्यस्य विशुद्धं ज्ञानं विश्वसनीयात्, मौलिकात्, नाट्यस्यादिग्रन्थाद् भारतीयनाट्यशास्त्रादुपादेयम् । सोदाहरणं भावममुमित्थं विवृणोमि—ये खलु भागीरथ्या विशुद्धं प्रासादिकं च जलं कामयन्ते, तैः समतलभूभागापेक्षया गङ्गाया उद्गमप्रदेशात् हिमालयादेव साक्षात् तद् ग्रहणीयम् । एवमेव ये खलु नाट्यस्य यथार्थस्वरूपमभिमतं वा ज्ञातुकामास्तैरपि मूलतो नाट्यस्योद्गमभूमिः भरतकृतं नाट्यशास्त्रमाश्रयणीयं न तु धनञ्जय-विश्वनाथ–प्रभृतिभिः प्रणीताः परवर्तिनो ग्रन्थाः । नाट्यशास्त्रीय-पारिभाषिकशब्दानुक्रमणिकेयं नाट्यवेदस्य पारमार्थिकानां रुचिः संवर्धयेदिति धिया निबद्धा । नाट्यस्य परिभाषाणां भरतदिशा कः सम्यगभिप्राय इति ज्ञानं तु संपूर्णे नाट्यशास्त्रे स्थाने स्थाने प्रयुक्तानां समानानां पारिभाषिकपदानामेकत्र संग्रहेण तेषां तुलनात्मकेनाध्ययनेनैव सम्भवेत् । अत एवास्मिन् ग्रन्थे विभिन्नेषु अध्यायेषु पृथक् पृथक् प्रसङ्गेषु प्रयुक्तानां समानानां शब्दानां संग्रहः समुपस्थापितः, येन नाट्यशास्त्रीयपरिभाषाणां वास्तविकाभिप्रायपरिज्ञाने नाट्यस्यादिमुनेर्भरतस्य यथार्थमभिमतमवगम्येत ।

सन्ति खलु भूयांस प्रकाशितानि नाट्यशास्त्रसंस्करणानि । अत्र पारिभाषिकशब्दानुक्रमणिका-निर्माणे गायकवाड-प्राच्यग्रन्थमालाया नाट्यशास्त्रमस्माभिराश्रितम् । इदमपि संस्करणं न खलु सर्वथा विशुद्धं, तथापि सम्प्रति नाट्यशास्त्रस्य यान्यन्यानि संस्करणानि समुपलभ्यन्ते तदपेक्षयालोचनात्मकदृष्ट्या सम्पादितमिदं सर्वेषु संस्करणेषु श्रेष्ठम् । पाठकानामाकांक्षानुरूपोऽयं ग्रन्थः सम्पत्स्यत इत्यस्ति मम सम्प्रत्ययः ।





नाट्यशास्त्रीय-पारिभाषिक-शब्दानुक्रमणिका

नाट्यशास्त्रीय-पारिभाषिक-शब्दानुक्रमणिका

अ

आ

इ

ई

उ

क

च

छ

द

न

प

म

ल


व

श

ष

स

ह


महर्षि–पाणिनि–प्रज्ञा–
तिथि......9 8 1
पु०सं०..........
भारती पुस्तकालय